SUṢAMĀ : Multidisciplinary Research Journal ISSN: 3107-4529
(International Peer-Reviewed & Refereed Journal)
Vol. 1, Issue-3, (Jul-Sep) 2025

# योगवेदान्तदर्शनदृष्ट्या मनसः स्वरूपम्

## Yogavedāntadarśanadṛṣṭyā manasaḥ svarūpam

**Sreeta Dey**
Research Scholar, Dept. of Sanskrit
Tripura University, Tripura, India
Email: sreeta.net@gmail.com

**Abstract**: भारतीयदर्शनं आस्तिकनास्तिकाभ्यां द्विधा विभक्तम्। आस्तिकदर्शनानि न्याय-वैशेषिक-सांख्य-योग-पूर्वमीमांसा-उत्तरमीमांसादर्शनानि षड्संख्यकानि प्रथितानि। नास्तिकदर्शनानि चार्वाक-जैन-बौद्धाख्यानि त्रीणि सन्ति। एषु आस्तिकदर्शनेषु योगदर्शनं वेदान्तदर्शनञ्च अन्यतमे विश्रुते च स्तः। अस्मिन् दर्शनद्वये मनसः महत्त्वं विशेषतया परिलक्ष्यते। योगदर्शने मनः चित्तत्वेन पर्यावसितम्। तत्र चित्तस्य समाधिरेव योगः प्रोक्तः। योगदार्शनिकानां नये चित्तस्य किं स्वरूपमिति प्रपञ्चनमेव अस्य शोधपत्रस्य एकदेशी विस्तारः। वेदान्तः उत्तरमीमांसादर्शनस्य पर्यायः। वेदस्य अन्तः इत्यर्थे वेदान्तः। अत्र अन्तशब्दः उत्कृष्टार्थकः। वैदान्तिकानां अन्तःकरणे एव मनसः अन्तर्भावः। एतेषां नये अन्तःकरणानि त्रीणि– महत् अहङ्कारः मनश्चेति। एतेषां स्वरूपम् उक्त्वा मनसः विचारोऽपि अस्मिन् शोधप्रबन्धे प्रदास्यते। तत्र वेदान्तस्य प्रस्थानत्रयस्य प्रमाणवचनमपि उल्लिखिष्यते। इत्थं योगदर्शनमते वेदान्तदर्शनमते च मनसः स्वरूपं शोधप्रबन्धे अस्मिन् समासेन प्रतिपादितं भविष्यति।

**Keywords:** भारतीयदर्शनम्, योगदर्शनम्, वेदान्तदर्शनम्, चित्तम्, मनः, अन्तःकरणम्।

षड्दर्शनेषु योगदर्शनम् अन्यतमं भवति। किञ्च योगदर्शनस्य सर्वप्राचीनत्वमपि सर्वैः अङ्गीक्रियते। यतो हि अस्मिन् दर्शने अन्येषां दर्शनग्रन्थानां मतोल्लेखः मतखण्डनं वा न परिलक्ष्यते। 'हिरण्यगर्भो योगस्य वक्ता नान्यः पुरातनः'[1] इति वाक्येन ज्ञायते योगस्य आदिमः प्रवक्ता हिरण्यगर्भः। हिरण्यगर्भः कपिलस्यैव नामान्तरमिति महाभारतं कथयति। तत्रोक्तम्– 'यामाहुः कपिलं सांख्याः परमर्षिं प्रजापतिम्'[2] इति। किन्तु जगति सर्वेषां ज्ञानानाम् अपौरुषेयत्वं विचिन्त्य हिरण्यगर्भपदेन अस्माभिः सृष्टिकर्ता ब्रह्मा एव बोध्यः। अतः पतञ्जलिः अस्य दर्शनस्य आदिप्रवक्ता नास्ति। स केवलं सम्प्रदायतः प्राप्तां योगविद्यां संक्रामितवान्। योगदर्शनविषये पतञ्जलेः महर्षेः ग्रन्थो भवति अष्टाङ्गयोगसूत्रम् इति। योगस्य अष्टौ अङ्गानि सन्ति इति कारणात् इत्थं नामकरणम्। योगशब्दः अनेकेषु अर्थेषु प्रयुज्यते। किन्तु प्रकृतशास्त्रे योगशब्दः समाधौ वर्तते। आत्मसाक्षात्कारस्य उपायो भवति अयं योगः इत्येव योगस्य माहात्त्वम्। तथाहि योगस्य अर्थं भाष्यकारः स्वयम् निर्दिष्टवान्– योगः समाधिः इति। तत्र पुनः चित्तस्य समाधिरेव योग उच्यते। अतः योगदर्शने चित्तस्य महती भूमिका दृश्यते। तत्र योगदार्शनिकैः चित्तस्य स्वरूपं कथं प्रपञ्चितमित्यस्य विचार एवात्र प्रस्तूयते।

'योगश्चित्तवृत्तिनिरोधः'[3] इति सूत्रं पातञ्जलयोगदर्शनस्य समाधिपादे विराजते। चित्तवृत्तेः निरोधत्वमेव योगस्य लक्षणं भवति। निरोधशब्दस्य लौकिकार्थः निग्रहः इति। किन्तु प्रकृतशास्त्रे निग्रहस्य फलं यत् एकाग्रता स एव निरोधपदार्थः। अतः चित्तस्य एकाग्रता भवति समाधिः। किन्तु पातञ्जलयोगदर्शने अस्य चित्तस्य स्वरूपं साक्षात् सूत्रेण नोक्तं दृश्यते। अस्मिन् विषये सांख्यानाम् अभिमतमेव तैः अङ्गीक्रियते। यतो हि सांख्ययोगदर्शनयोः मध्ये अविनाभावसम्बन्धः वर्तते। येन एकतराभावे अपरस्य निष्प्रयोजनत्वम्। सांख्यानां नये मनसः उत्पत्तिः वैकृताद् अहङ्काराद् भवति। अत्र मनः इन्द्रियत्वेन परिगणितम्। सात्त्विकाहङ्कारोपादानत्वम् इन्द्रियत्वमिति षड्विंशकारिकायाः व्याख्यायां वाचस्पतिमिश्रेण उक्तम्। तच्च इन्द्रियं द्विविधं बुद्धीन्द्रियं कर्मेन्द्रियञ्च। किन्तु मनः भवति उभयात्मकम् इन्द्रियम्। उभयात्मकं नाम बुद्धीन्द्रियकर्मेन्द्रियोभयात्मकम्। यतो हि चक्षुरादिबुद्धीन्द्रियाणि वागादिकर्मेन्द्रियाणि च मनसा सह संयुज्यैव स्वस्वविषये प्रवर्तन्ते। मनःसंयोगं विना बुद्धिकर्मेन्द्रियाणां स्वविषयप्रवृत्तौ सामर्थ्यं नास्ति। मनसः बुद्धीन्द्रियत्वम् अनुमानेन सिध्यति। मनः बुद्धीन्द्रियं बुद्धीन्द्रियकार्य्यजनकसंयोगाश्रयत्वात् चक्षुरादिवत् इति अनुमानस्य रूपम्। किञ्च मनसः कर्मेन्द्रियत्वं मनः कर्मेन्द्रियं कर्मेन्द्रियकार्य्यजनकसंयोगाश्रयत्वात् वागादिवत् इति अनुमानेन सिध्यति। मनसः असाधारणं लक्षणं हि सङ्कल्पकं मनः इति। अस्मिन् प्रसङ्गे कारिकाप्रमाणम्–

'उभयात्मकमत्र मनः सङ्कल्पकमिन्द्रियं च साधर्म्यात्।
गुणपरिणामविशेषान्नानात्वं वाह्यभेदाश्च'॥

सम्यक् कल्पयति इति सङ्कल्पकम्। कल्पना विशेष्यविशेषणभावेन सम्भवति। अयं घटः पटः न, अयं पटः न घटः इत्यादिप्रकारकं ज्ञानं भवति सङ्कल्पकम्। दर्शनान्तरपरिभाषायां इदं सङ्कल्पात्मकं ज्ञानं भवति सविकल्पकं ज्ञानम्। अतः मनः न स्वीक्रियते चेत् सविकल्पकं ज्ञानं नोपपद्येत। तस्मात् सङ्कल्पकं मनसः स्वरूपमिति स्वीकार्यम्।

एतेषां नये अन्तःकरणानि त्रीणि– महत् अहङ्कारः मनश्चेति। अध्यवसायो महत्, अभिमानोऽहङ्कारः, सङ्कल्पकं मनः भवति। अध्यवसायादायः भवन्ति असाधारणव्यापाराः अन्तःकरणत्रयस्य। अन्तःकरणानां साधारणवृत्तिः प्राणाद्या वायवः पञ्च। वस्तुतः अन्तःकरणत्रयस्य राजसवृत्तिः राजसपरिणामो वा भवति प्राणाः।

'चित्तं हि प्रख्याप्रवृत्तिस्थितिशीलत्वात् त्रिगुणम्' इति व्यासभाष्ये चित्तस्य त्रैगुण्यमुक्तम्। स्वभावत एव त्रिगुणमयं चित्तम् अचेतनं भवति। त्रैगुण्ये सत्त्वेऽपि कालविशेषे सत्त्वगुणस्य आधिक्यमेव चित्ते दृश्यते। सत्त्वस्य आधिक्यादेव पुरुषसान्निध्ये चित्तं चैतन्यवत् भाति। वस्तुतः तदा पुरुषस्य चैतन्यं चित्ते प्रतिविम्बितं भवति। किन्तु सर्वदा चित्ते सत्त्वस्यैव आधिक्यं न स्यात्। यतो हि गुणानां वैषम्यादेव क्षिप्तादयः चित्तावस्थाविशेषाः सञ्जायन्ते। प्रकृतेः सात्त्विकपरिणामो भवति प्रख्यारूपं चित्तम्, राजसिकपरिणामः प्रवृत्तिरूपं चित्तं, स्थितिरूपे चित्ते प्रकृतेः तामसिकपरिणामो विद्यते। चित्तस्य अवस्थाविशेषः योगदार्शनिकैः चित्तभूमिशब्देन व्यवह्रियते।

चित्तवस्था योगदर्शने पञ्चधा उक्ता– क्षिप्तं मूढं विक्षिप्तम् एकाग्रं निरुद्धं चेति[4]। किञ्च चित्तस्य वृत्तयोऽपि पञ्च स्वीक्रियन्ते। प्रमाणविपर्ययविकल्पनिद्रास्मृतयश्चेति। योगदार्शनिकानां नये अभ्यासेन वैराग्येण च चित्तवृत्तीनां निरोधः सम्भवति। यमनियमासनप्राणायामप्रत्याहारधारण-ध्यानप्रभृतियोगाङ्गानाम् अनुष्ठानेन अभ्यासः कर्तव्यः। तत्र सूत्रं हि– 'तत्र स्थितौ यत्नोऽभ्यासः' इति। दृष्टानुश्रविकविषयेषु विरागः वैराग्यम्। तथा चोक्तम्– 'दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम्' इति। चित्तवृत्तीनां लये समाधिः भवति। तदा पुरुषस्य स्वरूपे अवस्थानं भवति। इत्थं चित्तस्य स्वरूपं योगदर्शने प्रतिपादितम् अस्ति।

वेदस्य अन्तः इति वेदान्तः। अन्तशब्दः अत्र सारवाची। वेदान्तशास्त्रस्य सम्यक् ज्ञानं केवलम् उपनिषदां पाठेन न सम्भवति। तदर्थं प्रस्थानत्रयस्य ज्ञानमपि आवश्यकं भवति। प्रस्थानत्रयं हि श्रुतिप्रस्थानं न्यायप्रस्थानं स्मृतिप्रस्थानञ्च। उपनिषदः श्रुतौ अन्तर्भवन्ति। न्यायप्रस्थानस्य प्रधानग्रन्थस्तावत् ब्रह्मसूत्रम्। स्मृतिप्रस्थाने श्रीमद्भगवद्गीतादयः विराजन्ते। प्रस्थानत्रयस्योपरि आचार्यस्य शङ्करस्य भाष्यमेव मानम्। तत्र वेदान्तमते अन्तःकरणस्य स्वरूपं किं तत् समासेन अधस्तावत् वितन्यते।

अन्तः करणं इति विग्रहे कर्मधारयसमासे अन्तःकरणम् इति। अन्तःकरणशब्दे अन्तः इति शब्द मध्यवर्त्तिवाची, करणं नाम ज्ञानसाधनम् इन्द्रियम्। अन्तःकरणमित्युक्ते अन्तरिन्द्रियम्। वैदान्तिकानां नये आकाशादिगतसात्त्विकांशेभ्यः मिलितेभ्यः अन्तःकरणानि उत्पद्यन्ते। एतेषां प्रकाशस्वभाव एवात्र मानम्। यतो हि सत्त्वगुणस्यैव स्वभावः प्रकाशः। तथा चोक्तं गीतायाम्– निर्मलत्वात् प्रकाशकमनामयम् इति। वेदान्तदर्शनानुसारम् अन्तःकरणं मुख्यतः द्विविधं भवति बुद्धिः मनश्च। अनेके पृथक्तया चित्ताहङ्कारयोरपि अन्तःकरणत्वं स्वीकुर्वन्ति। किन्तु वैदान्तिकाः चित्ताहङ्कारयोः बुद्धिमनसोः मध्ये एव अन्तर्भावं प्रतिपादयन्ति। तेषां नये बुद्धौ चित्तस्य मनसि चाहङ्कारस्य अन्तर्भावः। वस्तुतः अन्तःकरणम् एकमेव, वृत्तिभेदेन तस्य द्वैविध्यं चातुर्विध्यं वा निर्णीयते। यथा एक एव जनः वृत्तिभेदेन पाठकः पाचकः पूजकः भवति तद्वत्। वेदान्तमते मनो नाम संकल्पविकल्पात्मिका अन्तःकरणवृत्तिः। बुद्धिः नाम निश्चयात्मिका अन्तःकरणवृत्तिः। संशयः मनसः धर्मः। एकस्मिन् क्षणे मनः इदम् इत्थमिति सङ्कल्प्य परस्मिन् क्षणे विपरीतं किमपि विकल्पं चिन्तयति। यथा अहं चिद्रूपः इति सङ्कल्प्य देहो वेति विकल्पं विचिन्त्य संशयं जनयति। तेन मनः भवति संशयात्मिका अन्तःकरणवृत्तिः। किञ्च मनः किमपि स्थिरं ज्ञानं दातुं न शक्नोति। किन्तु बुद्धिः तथा न, सा निश्चयं दातुं शक्नोति। यथा अहं ब्रह्मैव इत्थं निश्चयं ज्ञानं बुद्धिः जनयति। बुद्धौ नास्ति संशयस्य लेशः। अन्तःकरणस्य एतद् भेदद्वयमेव प्रसिद्धम्। किन्तु केचन अतिरिक्ततया चित्तम् अहङ्कारञ्च स्वीकुर्वन्ति। तयोः स्वरूपं वेदान्तसारे निगदितम् यत्– 'अनुसन्धानात्मिका अन्तःकरणवृत्तिः चित्तम्। अभिमानात्मिका अन्तःकरणवृत्तिः अहङ्कारः' इति। अहं सुखेन निद्रित आसम् इत्येतादृशम् अन्तःकरणं चित्तम्। अहं पण्डितः इति अभिमानात्मकवृत्तिमत् अन्तःकरणम् अहङ्कारः। यतो हि अन्ते गत्वा स्मरणात्मिका

निश्चयात्मिका एव भवति तथा अभिमानात्मिका सङ्कल्पात्मिका एव भवति तेन चित्ताहङ्कारयोः पृथक् स्वीकारः अनावश्यकः इति उच्यते।

श्रीमद्भगवद्गीतायामपि अन्तःकरणस्य वेदान्तदिशा आलोचना दृश्यते। तत्र उक्तम् जीवात्मा स्वयं विषयं भोक्तुं न शक्नोति किन्तु मनसा इन्द्रियैः शब्दादिविषयान् उपसेवते। अतः विषयभोगः मनसा एव सम्भवति। तत्रोक्तम्–

'श्रोत्रं चक्षुः स्पर्शनञ्च रसनं घ्राणमेव च।
अधिष्ठाय मनश्चायं विषयनुपसेवते'[5]॥

मनः स्वभावत एव चञ्चलमिति गीतायामुक्तम्। तस्य चञ्चलात्मकस्य मनसः निग्रहः कथं सम्भवतीत्यस्मिन् प्रसङ्गे भगवता गीतयामुपदिष्टम्–

'असंशयं महाबाहो मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते'[6]॥

'मय्येव मन आधत्स्व मयि बुद्धिं निवेशय'[7] इत्यस्मिन् श्लोकभाष्ये भगवच्छङ्करेण मनसः स्वरूपं सङ्कल्पविकल्पात्मकमेव उक्तम्। किञ्च 'बुद्धिर्ज्ञानमसम्मोहः क्षमा सत्यं…'[8] इत्यत्र गीताभाष्ये शङ्करमते बुद्धिर्हि सूक्ष्माद्यर्थावबोधनसामर्थ्यम् अन्तःकरणम्। इति शम्।

## Endnotes

1. याज्ञाबल्क्यस्मृतौ
2. महाभारतस्य शान्तिपर्वणि
3. पातञ्जलयोगसूत्रम् १.२
4. पातञ्जलयोगसूत्रम्
5. श्रीमद्भगवद्गीता १५.९
6. तत्रैव ६.३५
7. तत्रैव १२.८
8. तत्रैव १०.४

## Bibliography


- पतञ्जलिः। २००२। *पातञ्जलयोगदर्शन*। आरण्य, हरिहरानन्द (सम्पा.)। कलिकाता : पश्चिमवङ्ग-राज्यपुस्तक-पर्षत्।
- सदानन्द। १९९८। *वेदान्तसारः*। अमृतत्वानन्दः, स्वामी (सम्पा.)। कलिकाता : उद्बोधनकार्यालय।
- सदानन्द। १९९३। *वेदान्तसारः*। मेधाचैतन्यः, ब्रह्मचारी (सम्पा.)। कलिकाता : श्रीरामकृष्णवेदान्तमठ।
- कृष्णद्वैपायनः। १९६८। श्रीमद्भगवद्गीता। वासुदेवानन्दः, स्वामी (सम्पा.)। कलिकाता : उद्बोधनकार्यालय।
- सारदानन्दः, स्वामी। १३८९। *गीतातत्त्व*। कलिकाता : उद्बोधनकार्यालय।